सम्भवोदाहरणमेव तत् । पृषोदरादित्वाद् दशशब्दलोपः । दीव्यन्त्यत्रेति द्यौः । *'दिवेर्द्यौ दिवि' इति द्योप्रत्ययः । गोशब्दवद् रूपम् । दिविति *'दिवेर्डिविः' इत्यौणादिको डिविः । पदान्ते 'दिव उत्' (६. १. १३१) इत्युत्वे द्युभ्यामित्यादि । 'स्त्रियौ' इत्युक्तेऽपि यद् द्विपदस्योपादानं, तद् उक्तार्थानामपि प्रयोगो भवतीति ज्ञापनार्थम् । यथा—

"नरं च नारायणमेव चादौ स्वतः सुतौ द्वौ जनयाम्बभूव"

इति । त्रिदशानां विष्टपं भुवनमिति त्रिविष्टपम् । पृषोदरादित्वाद् दशशब्दलोपः[1] । विष्टपशब्दस्य पुन्नपुंसकत्वम् । तथा चामरमाला—'भुवनं[2] ‡विष्टपं पुमान्' । अतः 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' (२. ४. २६) इत्युक्तपुंलिङ्गत्वे प्राप्ते यत्र 'क्लीब' इति करोति, तत्र 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति युक्तिः । क्लीबशब्दे ओष्ठ्यो वः । 'क्लीबृ अधार्ष्ट्ये' । अस्मादोष्ठ्यकारिकापठिताद् इगुपधात् कः । तथा चौष्ठ्यकारिका—

"भ्वादौ वः पवर्गीयो बाधिबन्दतिबाङ्क्षिषु ।
बंहिबृंहिबधोबुन्दिबाह्लम्ब्याविबचुम्बिषु ॥
बहतौ बेहतौ चैव कबतौ रम्बतौ तथा ।
क्लीबिक्षीबतिबस्केषु कुम्बिलुम्ब्योर्बुधिद्वये ॥
स्थैर्ये बदे बिटे शब्दे बटे च परिभाषणे ।
बनतौ स्याद् रणे चौष्ठ्यः प्राणने बलतावपि ॥
बृन्ह्येकम्बिलस्रादौ स्याद् बुधिबिस्योर्बुसौ श्यनि ।
तुदादौ बिलतावेव ब्रीबभ्रात्योः क्रियादिषु ॥
सम्बे पम्बे बृहे शुल्बे स्यात् कुम्बिलुबितुम्बिषु ।
(ब ? ब्रू )सबर्हयोर्बस्ते च प्राणनार्थे भवेद् बले.॥

१. 'पृषोदरादीनि यथोपदिष्टम् इति द' ङ. छ पाठः　२. 'पः' क ख. ग. घ. पाठः.

* इदं मुद्रितोणादौ न दृश्यते । ‡ 'पिष्टपो विष्टपोऽप्यस्त्री' इति अमरव्याख्यायां भानुजिदीक्षितः ।

DR.RUPNATHJI(DR.RUPAK NATH)

स परिमलोऽतिनिर्हारी दूरगामी आमोदः । '(मर्दी†मुद) हर्षे' । करणे घञ् ॥

**वाच्यलिङ्गत्वमा गुणात् ॥ १० ॥**

आ गुणाद् 'गुणे शुक्लादयः पुंसि' इति यावत् समाकर्ष्यादीनां वाच्यलिङ्गत्वम् ॥

**समाकर्षी तु निर्हारी**

समाकर्षिद्वयं दूरगामिगन्धे । उभयत्रैवावश्यके णिनिः ॥

**सुरभिर्घ्राणतर्पणः ।**

**इष्टगन्धः सुगन्धिः स्याद्**

सुरभिचतुष्कं सुगन्धौ । केचिदिष्टगन्धद्वयम् अभितो गन्धो यस्य तस्मिन् वर्णयन्ति । वसन्ते सुरभिरुक्तः । इष्टो गन्धोऽस्येतीष्टगन्धः । [1]एवं सुगन्धिः । 'गन्धस्येदुत्पूति—' (५. ४. १३५) इत्यादिना इकारः समासान्तः । सुगन्धिश्चन्दन इति ॥

**आमोदी मुखवासनः ॥ ११ ॥**

आमोदिद्वयं मुखवास[3]पटिकादौ । आमोदयोगादामोदी । अत इनिः । मुखवासन इति । [4]नन्द्यादिल्युः । शुभवासन इति पाठे शुभं मनोहरं वासनं वासो यस्येति बहुव्रीहिः ॥

**पूतिगन्धिस्तु दुर्गन्धः**

पूतिगन्धिद्वयं दुर्गन्धे । सुगन्धिवत् पूतिगन्धिः । दुष्टो गन्धोऽस्येति दुर्गन्धः । उत्पूत्यादिष्वसन्निवेशादिकारः समासान्तोऽत्र नास्ति । तथा च काव्या-(दर्शे†लङ्कारे) वामनः—"दुर्गन्धिमदादिषु पदेषु इत् समासान्तो दुर्लभः, उत्पूत्यादिषु दुश्शब्दस्यापाठात्" । केचिद् दुर्गन्धशब्दाद् मत्वर्थीयमिनिं कृत्वा दुर्गन्धीति नान्तं पठन्ति । तदयुक्तम् । यदाह कात्यायनः — '**बहुव्रीहिमत्वर्थी-**

१. 'सुगन्धिरेवम् ।' ङ. छ. पाठः. २. 'खासवप' क. पाठः. ३. 'सि' ङ. छ. पाठः. ४. 'दित्वाल्युः ।' च. पाठः.

† 'न्धिपदे इ' मुद्रितकाव्यालङ्कारपाठः ।

ययोर्बहुव्रीहिर्विशेष्टो लाघवाद्' इति । अन्ये पुनर्लाघवं नाद्रियन्ते । तथा च विभाकरवर्मा—

"यद् दुर्गन्धि मदाविलं मलशतैर्यत् पूतिनाडीमयम्"

इति । शृङ्गारप्रकाशे तूक्तं—"द्विविधो हि वाच्यधर्मः लघुर्गुरुश्च । तत्र कर्मधारयमत्वर्थीयाद् बहुव्रीहिणा लघुः । बहुव्रीहेः कर्मधारयमत्वर्थीयेन च गुरुः । तत्राद्यो यथा—

"यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥" (पूर्वमे० श्लो० १)

अन्तिमो यथा—

"बिसकिसलयच्छेदपाथेयवन्तः"

इति ॥

**विस्रं स्यादामगन्धि यत् ।**

विस्रद्वयम् **आमगन्धौ** । 'विस प्रेरणे' । हलन्त्यः । बाहुलकात् 'स्फायितञ्चिवञ्चि—' (उ० २. १३) इत्यादिना रक् । आमगन्धीति । 'उपमानाच्च' (५. ४. १३७) इति इत् समासान्तः ॥

**शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः ॥ १२ ॥**
**अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः ।**

शुक्लादयस्त्रयोदश **शुक्लवर्णे** । 'ऋज्रेन्द्राग्र—' (उ० २. ३१) इत्यादौ शुक्लो निपातितः । 'शुभ शोभार्थे' । 'स्फायितञ्चि—' (उ० २. १३) इत्यादिना रक् । शुभ्रः । शुचिरग्नावुक्तः । 'श्विता वर्णे' । 'अकर्तरि च—' (३. ३. १९) इति घञ् । श्वेतः । तथा च 'श्वेतो धावति' इति ताल्व्यश्लेषः । 'शद्लृ शातने' । पूर्ववदच् । विपूर्वः । विशदः ।

"विशदाविशदामत्तसारसे सारसे जले"

इति काव्यादर्शयमकम् । 'श्यैङ् गतौ' । 'हृश्याभ्याम्—' (उ० ३. ९३) इतीतच्* । श्येतः । 'पडि गतौ' । 'पडेर्दीर्घश्च' इत्यरः । पाण्डरः । अव-

---

* अत्र इतन्प्रत्यय एव मुद्रितोणादौ विधीयते ।

DR RUPNATHJI( DR RUPAK NATH )

(उ० ४. २०३) इत्यसुन् तुट् च प्रत्ययस्य ॥

**आतरस्तरपण्यं स्याद्**

**नद्यादेस्तरणे कपर्दकादावातरद्वयम्** । तरतेः करणे (घञ्? घः) ।

**द्रोणी काष्ठाम्बुवाहिनी ॥ ११ ॥**

द्रोणीद्वयं **काष्ठकृतसेचन्याम्** । 'कृपॄजॄष्वृसिद्रुपन्यनिस्वपिभ्यो नित्'[1] (उ० ३. १०) इति निः । गौरादिङीषि द्रोणी । काष्ठाम्बुवाहिनीति षष्ठीसमासः ॥

**सांयात्रिकः पोतवणिक्**

सांयात्रिकद्वयं **वहित्रगामिनि वणिग्जने** । संयात्रा द्वीपान्तरगमनमुच्यते । तदस्य प्रयोजनमिति[2] ठक् । सांयात्रिकः । पोतवणिग् श्रान्तः ॥

**कर्णधारस्तु नाविकः ।**

कर्णधारद्वयं **कर्णहार**[3] इति ख्याते । नौकाकर्णप्रायं महाकेनिपातं धारयतीति कर्णधारः । 'कर्मण्यण्' (३. २. १) । नाविक इति । नावा तरतीत्यस्मिन्नर्थे 'नौद्व्यचष्ठन् (४. ४. ७) ॥

**नियामकाः पोतवाहाः**

नियामकद्वयं गुणवृक्षपरिस्थे "**निजिर्वा**'[4] इति ख्याते । केचिद् नौवा(टि? ह)कस्य नामद्वयमिदं मन्यन्ते । नियमयन्तीति नियामकाः । 'यमु उपरमे' । ण्वुल् । पोतं वाहयन्तीति पोतवाहाः । 'कर्मण्यण्' (३. २. १) ॥

**कूपको गुणवृक्षकः ॥ १२ ॥**

**गुणरूत्थाख्ये**[5] कूपकद्वयम् । कूपक उक्तः । गुणवृक्षक इति षष्ठीसमासः ॥

---

१. 'नित् । गौ' घ. ङ. च. छ. पाठः. २. 'त्वनेन ठ' घ. ङ. च. छ. पाठः. ३. 'धा' घ. च. पाठः. ४. 'वावा इ' घ. ङ. च. छ. पाठः. ५. 'रूथ्याख्ये' ङ. छ. पाठः.

DR.RUPNATHJI( DR.RUPAK NATH )

